# मन्त्र पुष्पम्

यो॑ऽपां पुष्पं॒ वेद॑ पुष्प॑वान् प्र॒जावा॑न् पशु॒मान् भ॑वति । च॒न्द्रमा॒ वा अ॒पां पुष्प॑म् । पुष्प॑वान् प्र॒जावा॑न् पशु॒मान् भ॑वति । य ए॒वं वेद॑ । यो॑ऽपामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।

अ॒ग्निर्वा अ॒पामा॒यत॑नम् । आ॒यत॑नवान् भवति । यो᳚ऽग्नेरा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति । आपो॒वा अ॒ग्नेरा॒यत॑नम् । आ॒यत॑नवान् भवति । य ए॒वं वेद॑ । यो॑ऽपामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।

वा॒युर्वा अ॒पामा॒यत॑नम् । आ॒यत॑नवान् भवति । यो वा॒योरा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति । आपो॒ वै वा॒योरा॒यत॑नम् । आ॒यत॑नवान् भवति । य ए॒वं वेद॑ । यो॑ऽपामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।

अ॒सौ वै तप॑न्नपा॒मायत॑नम् आ॒यत॑नवान् भवति । यो॑ऽमुष्य॒तप॑त आ॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति । आपो॑ वा अ॒मुष्य॒तप॑त आ॒यत॑नम् ।आ॒यत॑नवान् भवति । य ए॒वं वेद॑ । यो॑ऽपामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।

च॒न्द्रमा॒ वा अ॒पामा॒यत॑नम् । आ॒यत॑नवान् भवति । यः च॒न्द्रम॑स आ॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति । आपो॒ वै च॒न्द्रम॑स आ॒यत॑नम् । आ॒यत॑नवान् भवति । य ए॒वं वेद॑ । यो॑ऽपामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।

नक्ष॑त्त्राणि वा अ॒पामा॒यत॑नम् । आ॒यत॑नवान् भवति । यो नक्ष॑त्त्राणामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति । आपो॒ वै नक्ष॑त्त्राणामा॒यत॑नम् । आ॒यत॑नवान् भवति । य ए॒वं वेद॑ । यो॑ऽपामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।

प॒र्जन्यो॒ वा अ॒पामा॒यत॑नम् । आ॒यत॑नवान् भवति । यः प॒र्जन्य॑स्या॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति । आपो॒ वै प॒र्जन्य॑स्या॒यत॑नम् । आ॒यत॑नवान् भवति । य ए॒वं वेद॑ । यो॑ऽपामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।

स॒ंव॒त्स॒रो वा अ॒पामा॒यत॑नम् । आ॒यत॑नवान् भवति । यः सं॑वत्स॒रस्या॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति । आपो॒ वै सं॑वत्स॒रस्या॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति । य ए॒वं वेद॑ । यो॑ऽप्सु नाव॒ं प्रति॑ष्ठितां॒ वेद॑ । प्रत्ये॒व ति॑ष्ठति ।

ॐ रा॒जा॒धि॒रा॒जाय॑ प्रस॒ह्य साहिने᳚ । नमो॑ व॒यं वै᳚श्रव॒णाय॑ कुर्महे᳚ । स मे॒ कामा॒न् काम॒ कामा॑य॒ मह्य᳚म् । का॒मे॒श्व॒रो वै᳚श्रव॒णो द॑दातु । कु॒बे॒राय॑ वै᳚श्रव॒णाय॑ । म॒हा॒रा॒जाय॒ नमः॑ ।

ओ३ॅ तद्ब्रह्म । ओ३ॅ तद्वायुः । ओ३ॅ तदात्मा ।
ओ३ॅ तद्सत्यम् । ओ३ॅ तत्सर्वम् । ओ३ॅ तत्-पुरोर्नमः ॥

www.YouSigma.com

अन्तश्चरति भूतेषु गुहायां विश्वमूर्तिषु
त्वं यज्ञस्त्वं वषट्कारस्त्व-मिन्द्रस्त्वगं
रुद्रस्त्वं विष्णुस्त्वं ब्रह्मत्वं प्रजापतिः ।
त्वं तदाप आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ।

ईशानस्सर्व विद्यानामीश्वर स्सर्वभूतानां
ब्रह्माधिपतिर्-ब्रह्मणोऽधिपतिर्-ब्रह्मा शिवो मे अस्तु सदा शिवोम् ।

तद्विष्नोः परमं पदगं सदा पश्यन्ति
सूरयः दिवीवचक्षु राततं तद्वि प्रासो
विपस्यवो जागृहान् सत्समिन्धते
तद्विष्नोर्य-त्परमं पदम् ।

ऋतगं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥

ॐ नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ॥

ॐ शान्तिः शान्तिः शान्तिः ।